# Shri Ranganathashtottarashatanamastotram

# શ્રીરઙ્ગનાથાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : ranganAthAShTottarashatanAmastotram

File name : ranganAthAShTottarashatanAmastotram.itx

Category : vishhnu, aShTottarashatanAma

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 6, 2020

*sanskritdocuments.org*

# શ્રીરઙ્ગનાથાષ્ટોત્તરશતનામસ્તોત્રમ્

અસ્ય શ્રીરઙ્ગનાથાષ્ટોત્તરશતનામસ્તોત્રમહામન્ત્રસ્ય,વેદવ્યાસો
ભગવાનૃષિઃ, અનુષ્ટુપ્છન્દઃ, ભગવાન્ શ્રીમહાવિષ્ણુર્દેવતા ।
શ્રીરઙ્ગશાયીતિ બીજમ્, શ્રીકાન્ત ઇતિ શક્તિઃ, શ્રીપ્રદ ઇતિ કીલકમ્,
મમ સમસ્તપાપનાશાર્થે જપે વિનિયોગઃ ।
ધૌમ્ય ઉવાચ -
શ્રીરઙ્ગશાયી શ્રીકાન્તઃ શ્રીપ્રદઃ શ્રિતવત્સલઃ ।
અનન્તો માધવો જેતા જગન્નાથો જગદ્ગુરુઃ ॥ ૧॥

સુરવર્યઃ સુરારાધ્યઃ સુરરાજાનુજઃ પ્રભુઃ ।
હરિર્હતારિર્વિશ્વેશઃ શાશ્વતઃ શમ્ભુરવ્યયઃ ॥ ૨॥

ભક્તાર્તિભઞ્જનો વાગ્મી વીરો વિખ્યાતકીર્તિમાન્ ।
ભાસ્કરઃ શાસ્ત્રતત્ત્વજ્ઞો દૈત્યશાસ્તાઽમરેશ્વરઃ ॥ ૩॥

નારાયણો નરહરિર્નીરજાક્ષો નરપ્રિયઃ ।
બ્રહ્મણ્યો બ્રહ્મકૃદ્બ્રહ્મા બ્રહ્માઙ્ગો બ્રહ્મપૂજિતઃ ॥ ૪॥

કૃષ્ણઃ કૃતજ્ઞો ગોવિન્દો હૃષીકેશોઽઘનાશનઃ ।
વિષ્ણુર્જિષ્ણુર્જિતારાતિઃ સજ્જનપ્રિય ઈશ્વરઃ ॥ ૫॥

ત્રિવિક્રમસ્ત્રિલોકેશસ્ત્રય્યર્થસ્ત્રિગુણાત્મકઃ ।
કાકુત્સ્થઃ કમલાકાન્તઃ કાલિયોરગમર્દનઃ ॥ ૬॥

કાલામ્બુદશ્યામલાઙ્ગઃ કેશવઃ ક્લેશનાશનઃ ।
કેશિપ્રભઞ્જનઃ કાન્તો નન્દસૂનુરરિન્દમઃ ॥ ૭॥

રુક્મિણીવલ્લભઃ શૌરિર્બલભદ્રો બલાનુજઃ ।
દામોદરો હૃષીકેશો વામનો મધુસૂદનઃ ॥ ૮॥

પૂતઃ પુણ્યજનધ્વંસી પુણ્યશ્લોકશિખામણિઃ ।
આદિમૂર્તિર્દયામૂર્તિઃ શાન્તમૂર્તિરમૂર્તિમાન્ ॥ ૯॥

પરં બ્રહ્મ પરં ધામ પાવનઃ પવનો વિભુઃ ।
ચન્દ્રશ્છન્દોમયો રામઃ સંસારામ્બુધિતારકઃ ॥ ૧૦॥

આદિતેયોઽચ્યુતો ભાનુઃ શઙ્કરઃ શિવ ઊર્જિતઃ ।
મહેશ્વરો મહાયોગી મહાશક્તિર્મહત્પ્રિયઃ ॥ ૧૧॥

દુર્જનધ્વંસકોઽશેષસજ્જનોપાસ્તસત્ફલમ્ ।
પક્ષીન્દ્રવાહનોઽક્ષોભ્યઃ ક્ષીરાબ્ધિશયનો વિધુઃ ॥ ૧૨॥

જનાર્દનો જગદ્ધેતુર્જિતમન્મથવિગ્રહઃ ।
ચક્રપાણિઃ શઙ્ખધારી શાર્ઙ્ગી ખડ્ગી ગદાધરઃ ॥ ૧૩॥

એવં વિષ્ણોઃ શતં નામ્નામષ્ટોત્તરમિહેરિતમ્ ।
સ્તોત્રાણામુત્તમં ગુહ્યં નામરત્નસ્તવાભિધમ્ ॥ ૧૪॥

સર્વથા સર્વરોગઘ્નં ચિન્તિતાર્થફલપ્રદમ્ ।
ત્વં તુ શીઘ્રં મહારાજ ગચ્છ રઙ્ગસ્થલં શુભમ્ ॥ ૧૫॥

સ્નાત્વા તુલાર્કે કાવેર્યાં માહાત્મ્યશ્રવણં કુરુ ।
ગવાશ્વવસ્ત્રધાન્યાન્નભૂમિકન્યાપ્રદો ભવ ॥ ૧૬॥

દ્વાદશ્યાં પાયસાન્નેન સહસ્રં દશ ભોજય ।
નામરત્નસ્તવાખ્યેન વિષ્ણોરષ્ટશતેન ચ ।
સ્તુત્વા શ્રીરઙ્ગનાથં ત્વમભીષ્ટફલમાપ્નુહિ ॥ ૧૭॥

ઇતિ શ્રીરઙ્ગનાથાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।
અથવા
શ્રીરઙ્ગરાજનામરત્નસ્તોત્રમ્ શ્રીતુલાપુરાણાન્તર્ગતમ્

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Ranganathashtottarashatanamastotram*

pdf was typeset on January 6, 2020

Please send corrections to *sanskrit@cheerful.com*